# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् - ३** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड -** C.C-5.3.8 | समयः - ११:०० तः २:०० |
| दिनाङ्कः - २६.११.२०१६ | सन्दर्भग्रन्थः - परमलघुमञ्जूष, माधवीया धातुवृत्तिः च | |

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ कस्यचित् एकस्य उत्तरं लेख्यम् (४)

क) मञ्जूषादिशा किन्नाम द्योतकत्वम् इति विवृणुत।

ख) निपाताः द्योतका वा वाचका वा इत्यत्र मञ्जूषाकारमतं प्रतिपादयत।

प्रश्नः २ द्वयोः कस्यचित् एकस्य उत्तरं लेख्यम् (१२)

क) निपातविषयकं भूषणकारादिमतं किम्? ग्रन्थकारः तस्य खण्डनं कथं करोति?

ख) निपातविषये तार्किकाणां किं मतम्? ग्रन्थकरः तस्य खण्डनं कथं करोति?

प्रश्नः ३ अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तराणि लेख्यानि- (४)

क) चन्द्र इव मुखम् इत्यत्र स्वसदृशे अप्रसिद्धा शक्तिः एव केन नाम्ना प्रसिद्धा?

ख) उपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वं च के स्वीकुर्वन्ति?

ग) किन्नाम्म उपमानोपमेयोभयनिष्ठसाधारणधर्मवत्वेन ईषदितरपरिच्छेदकत्वम्?

घ) नञ् कतिविधः

ङ) देवाय नमः इत्यत्र नमः इति पदं कस्मिन् अर्थे वर्तते?

च) फलाश्रयः कः भवति?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ४ निम्नलिखियोरेकस्य प्रश्नस्य उत्तरं लेख्यम्- (४)

क) स्वशब्दैः लिङर्थं प्रतिपादयत।

ख) फलव्यापारयोस्तत्र फले तङ्-यक्-चिणादयः।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥ इति कारिका व्याख्येया

प्रश्नः ५ द्वयोः कस्यचित् एकस्य उत्तरं लेख्यम् (१२)

क) लकाराणाम् अर्थान् ग्रन्थदिशा विवेचयत।

ख) अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया॥ इति कारिकां स्पष्टयत।

प्रश्नः ६ केषाञ्चित् चतुर्णाम् उत्तराणि लेखनीयानि (४)

क) यास्कमते क्रियाप्रधानं किं भवति?

ख) अनुप्रयुक्तानां कृ-भू-अस्-धातूनां कः अर्थः अङ्गीक्रियते?

ग) लृट्-तिङः कः अर्थः?

घ) किन्नाम वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वम्?

ङ) वैयाकरणनये क्रिया कस्य अर्थः?

च) विधिराशीश्च कस्य अर्थौ?

तृतीयान्वितिः (युनिट- ३)

प्रश्नः ७ निम्नलिखियोरेकस्य प्रश्नस्य उत्तरं लेख्यम्- (४)

क) समासादिवृत्तीः विवेचयत।

ख) आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।

गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥ इति कारिकां विवेचयत।

प्रश्नः ८ कश्चित् एकः प्रश्नः समाधेयः (८)

क) सामर्थ्यविषये वैयाकरणानां मतं विवेचयत।

ख) समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने॥
स्यान्मद्गौरवं तस्मादिकार्थीभाव इष्यते। इति कारिकां व्याख्यात।

प्रश्नः ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं देयम्- (३)

क) सामर्थ्यं कतिविधम्?

ख) वृत्तेः द्वौ प्रकारौ कौ?

ग) किन्नाम अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वम्?

घ) नैयायिकमते समासे शक्तिः भवति न वा?

ङ) पदार्थः पदार्थैकदेशेनान्वेति न वा?

चतुर्थान्वितिः (युनिट- ४)

प्रश्नः १० निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क) लः कर्मणि च भावे चाऽकर्मकेभ्यः

ख) वर्तमाने लट्

प्रश्नः ११ कस्यचित् एकस्य उत्तरं लेख्यम् (८)

क) भवावः, भवतु चेति रूपद्वयं ससूत्रं साधयत।

ख) भूयात्, भवेत् चेति रूपद्वयं ससूत्रं साधयत ।

प्रश्नः १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं देयम्- (३)

क) टित्-लकाराः के?

ख) ङित्-लकाराः के?

ग) कः लकारः छन्दोमात्रगोचरः?

घ) सार्वधातुकार्धधातुकयोः इति सूत्रं किं विधत्ते?

ङ) लृङ् कस्मिन् अर्थे प्रयुज्यते?

च) लुङ् लकारः कस्मिन् अर्थे भवति?

***